श्री कमलांबिका स्तोत्रं

श्री कमलांबिका स्तोत्रं

बंधूकद्युतिमिंदुबिंबवदनां बृंदारकैर्वंदितां
मंदारादि समर्चितां मधुमतीं मंदस्मितां सुंदरीं |
बंधच्छेदनकारिणीं त्रिनयनां भोगापवर्गप्रदां
वंदेऽहं कमलांबिकामनुदिनं वांछानुकूलां शिवां || 1 ||

श्रीकामेश्वरपीठमध्यनिलयां श्रीराजराजेश्वरीं
श्रीवाणीपरिसेवितांघ्रियुगळां श्रीमत्कृपासागरां |
शोकापद्भयमोचिनीं सुकवितानंदैकसंदायिनीं
वंदेऽहं कमलांबिकामनुदिनं वांछानुकूलां शिवां || 2 ||

माया मोहविनाशिनीं मुनिगणैराराधितां तन्मयीं
श्रेयःसंचयदायिनीं गुणमयीं वाग्वादि भूतां सतां |
प्रातःकालसमानशोभमकुटां सामादि वेदैस्तुतां
वंदेऽहं कमलांबिकामनुदिनं वांछानुकूलां शिवां || 3 ||

बालां भक्तजनौघचित्तनिलयां बालेंदुचूडांबरां
सालोक्यादि चतुर्विधार्थफलदां नीलोत्पलाक्षीमजां |
कालारिप्रियनायिकां कलिमलप्रध्वंसिनीं कौलिनीं
वंदेऽहं कमलांबिकामनुदिनं वांछानुकूलां शिवां || 4 ||

आनंदामृतसिंधुमध्यनिलयामज्ञानमूलापहां
ज्ञानानंदविवर्धिनीं विजयदां मीनेक्षणां मोहिनीं |
ज्ञानानंदपरां गणेशजननीं गंधर्वसंपूजितां
वंदेऽहं कमलांबिकामनुदिनं वांछानुकूलां शिवां || 5 ||

षट्चक्रोपरि नादबिंदुनिलयां सर्वेश्वरीं सर्वगां
षट्शास्त्रागमवेदवेदितगुणां षट्कोणसंवासिनीं |
षट्कालेन समर्चितात्मविभवां षड्वर्गसंछेदिनीं
वंदेऽहं कमलांबिकामनुदिनं वांछानुकूलां शिवां || 6 ||

योगानंदकरीं जगत्सुखकरीं योगींद्रचित्तालयां
एकामीशसुखप्रदां द्विजनुतामेकांतसंचारिणीं |
वागीशां विधिविष्णुशंभुवरदां विश्वेश्वरीं वैणिकीं
वंदेऽहं कमलांबिकामनुदिनं वांछानुकूलां शिवां || 7 ||

बोधानंदमयीं बुधैरभिनुतां मोदप्रदामंबिकां
श्रीमद्वेदपुरीशदासविनुतां ह्रींकारसंधालयां |
भेदाभेदविवर्जितां बहुविधां वेदांतचूडामणिं
वंदेऽहं कमलांबिकामनुदिनं वांछानुकूलां शिवां || 8 ||

इत्थं श्रीकमलांबिकाप्रियकरं स्तोत्रं पठेद्यः सदा
पुत्रश्रीप्रदमष्टसिद्धिफलदं चिंताविनाशास्पदं |
एति ब्रह्मपदं निजं निरुपमं निष्कल्मषं निष्कलं
योगींद्रैरपि दुर्लभं पुनरयं चिंताविनाशं परं || 9 ||

इति श्री कमलांबिका स्तोत्रं |